# Mahopadesha Vimshatikam

# महोपदेशविंशतिकम्

## Document Information

Text title : Mahopadesha Vimshatikam by Abhinavagupta

File name : mahopadeshaviMshatikam.itx

Category : major_works, abhinavagupta, viMshati, upadesha, , kAshmIrashaivadarshanam

Location : doc_z_misc_major_works

Author : Abhinavagupta

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description-comments : from Abhinavastotravali

Latest update : December 18, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 24, 2024

*sanskritdocuments.org*

# महोपदेशविंशतिकम्

(महोपदेशविंशतिका)
प्रपञ्चोत्तीर्णरूपाय नमस्ते विश्वमूर्तये ।
सदादिव्यप्रकाशाय स्वात्मनेऽनन्तशक्तये ॥ १॥ (सदानन्दप्रकाशाय)

त्वं त्वमेवाहमेवाहं त्वमेवासि न चास्म्यहम् ।
अहं त्वमित्युभौ न स्तो यत्र तस्मै नमो नमः ॥ २॥

अन्तर्देहे मया नित्यं त्वमात्मा च गवेषितः ।
न दृष्टस्त्वं नचैवात्मा यच्च दृष्टं त्वमेव तत् ॥ ३॥

भवद्भक्तस्य सञ्जातभवद्रूपस्यथ मे पुनः । (सञ्जात) (मेऽधुना)
त्वामात्मरूपं सम्प्रेक्ष्य तुभ्यं मह्यं नमो नमः ॥ ४॥

एतद्वचननैपुण्यं यत्कर्तव्येतिमूलया । (मत्कर्त्तव्यं हि मूलतः)
भवन्मायात्मनस्तस्य केन कस्मिन् कुतो लयः ॥ ५॥

अहं त्वं त्वमहं चेति भिन्नता नावयोः क्वचित् ।
समाधिग्रहणेच्छाया भेदस्यावस्थितिर्ह्यसौ ॥ ६॥

त्वमहं सोऽयमित्यादि सोऽनन्तानि सदा त्वयि । (सोयमित्यादि नूनं तानि)
न लभन्ते चावकाशं वचनानि कुतो जगत् ॥ ७॥

अलं भेदानुकथया त्वद्भक्तिरसचर्वणात् ।
सर्वमेकमिदं शान्तमिति वक्तुं च लज्जते ॥ ८॥

त्वत्स्वरूपे जृम्भमाणे त्वं चाहं चाखिलं जगत् ।
जाते तस्य तिरोधाने न त्वं नाहं न वै जगत् ॥ ९॥

जाग्रतस्वप्नसुषुप्त्याद्या धारयंश्च निजाः कलाः।
स्वेच्छया भासि नटवन् निष्कलोऽसि च तत्त्वतः:॥ १०॥

त्वत्प्रबोधात् प्रबोधोऽस्य त्वन्निद्रातो लयोऽस्य यत् ।

अतस्त्वदात्मकं सर्वं विश्व सदसदात्मकम् ॥ ११॥

जिह्वा श्रान्ता भवन्नाम्नि मनः श्रान्तं भवत्स्मृतौ ।
अरूपस्य कुतो ध्यान निर्गुणस्य च नाम किम् ॥ १२॥

पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यञ्च शुद्धस्याचमनं कुतः ॥ १३॥

निर्मलस्य कुतः स्नानं वस्त्रं विश्वोदरस्य च ।
निर्लेपस्य कुतो गन्धो रम्यस्याभरणं कुतः॥ १४॥

निरालम्बस्योपवीतं पुष्पं निर्वासनस्य च ।
अघ्राणस्य कुतो धूपश्चक्षुर्हीनस्य दीपकः ॥ १५॥ (अप्राणस्य कुतो)

नित्यतृप्तस्य नैवेद्यं ताम्बूलं च कुतो विभोः।
प्रदक्षिणमनन्तस्याऽद्वितीयस्यय कुतो नतिः ॥ १६॥

स्वयं प्रकाशमानस्य कुतो नीराजनं विभोः ।
वेदवाचामवेद्यस्य कुतः स्तोत्रं विधीयते ॥ १७॥

अन्तर्बहिश्च पूर्णस्य कथमुद्वासनं भवेत् ।
भेदहीनस्य विश्वत्र कथं च हवनं भवेत् ॥ १८॥

पूर्णस्य दक्षिणा कुत्र नित्यतृप्तस्य तर्पणम् ।
विसर्जनं व्यापकस्याऽप्रत्यक्षस्य क्षमापणम् ॥ १९॥

एवमेव परा पूजा सर्वावस्थासु सर्वदा ।
ऐक्यबुद्ध्या तु सर्वेशे मनो देवे नियोजयेत् ॥ २०॥

॥ इति महामाहेश्वराचार्याभिनवगुप्तकृतं महोपदेशविंशतिकं सम्पूर्णम् ॥

(॥ इति महामाहेश्वराचार्याभिनवगुप्तकृता महोपदेशविंशतिका समाप्ता ॥)

Encoded and proofread by Ruma Dewan

*Mahopadesha Vimshatikam*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*